श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्तदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तदशः सर्गः ॥

## विभीषणस्य श्रीरामस्याश्रये गमनं श्रीरामेण मन्त्रिभिः सह तदर्थमाश्रयदाने विचारणं च

इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः।
आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः॥ **6.17.1** ॥

तं मेरुशिखराकारं दीप्तामिव शतह्रदाम्।
गगनस्थं महीस्थास्ते ददृशुर्वानराधिपाः॥ **6.17.2** ॥

ते चाप्यनुचरास्तस्य चत्वारो भीमविक्रमाः।
तेऽपि वर्मायुधोपेता भूषणोत्तमभूषिताः॥ **6.17.3** ॥

स च मेघाचलप्रख्यो वज्रायुधसमप्रभः।
वरायुधधरो वीरो दिव्याभरणभूषितः॥ **6.17.4** ॥

तमात्मपञ्चमं दृष्ट्वा सुग्रीवो वानराधिपः।
वानरैः सह दुर्धर्षश्चिन्तयामास बुद्धिमान्॥ **6.17.5** ॥

चिन्तयित्वा मुहूर्तं तु वानरांस्तानुवाच ह।
हनुमत्प्रमुखान् सर्वानिदं वचनमुत्तमम्॥ **6.17.6** ॥

एष सर्वायुधोपेतश्चतुर्भिः सह राक्षसैः।
राक्षसोभ्येति पश्यध्वमस्मान् हन्तुं न संशयः॥ **6.17.7** ॥

सुग्रीवस्य वचः श्रुत्वा सर्वे ते वानरोत्तमाः।
सालानुद्यम्य शैलांश्च इदं वचनमब्रुवन्॥ **6.17.8** ॥

शीघ्रं व्यादिश नो राजन् वधायैषां दुरात्मनाम्।
निपतन्ति हता यावद् धरण्यामल्पचेतनाः॥ **6.17.9** ॥

तेषां सम्भाषमाणानामन्योन्यं स विभीषणः।
उत्तरं तीरमासाद्य खस्थ एव व्यतिष्ठत॥ **6.17.10** ॥

स उवाच महाप्राज्ञः स्वरेण महता महान्।
सुग्रीवं तांश्च सम्प्रेक्ष्य खस्थ एव विभीषणः॥ **6.17.11** ॥

रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः।
तस्याहमनुजो भ्राता विभीषण इति श्रुतः॥ **6.17.12** ॥

तेन सीता जनस्थानाद्धृता हत्वा जटायुषम्।
रुद्धा च विवशा दीना राक्षसीभिः सुरक्षिता॥ **6.17.13** ॥

तमहं हेतुभिर्वाक्यैर्विविधैश्च न्यदर्शयम्।
साधु निर्यात्यतां सीता रामायेति पुनः पुनः॥ **6.17.14** ॥

स च न प्रतिजग्राह रावणः कालचोदितः।
उच्यमानं हितं वाक्यं विपरीत इवौषधम्॥ **6.17.15** ॥

सोऽहं परुषितस्तेन दासवच्चावमानितः।
त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः॥ **6.17.16** ॥

निवेदयत मां क्षिप्रं राघवाय महात्मने।
सर्वलोकशरण्याय विभीषणमुपस्थितम्॥ **6.17.17** ॥

एतत्तु वचनं श्रुत्वा सुग्रीवो लघुविक्रमः।
लक्ष्मणस्याग्रतो रामं संरब्धमिदमब्रवीत्॥ **6.17.18** ॥

प्रविष्टः शत्रुसैन्यं हि प्राप्तः शत्रुरतर्कितः।
निहन्यादन्तरं लब्ध्वा उलूको वायसानिव॥ **6.17.19** ॥

मन्त्रे व्यूहे नये चारे युक्तो भवितुमर्हसि।
वानराणां च भद्रं ते परेषां च परन्तप॥ **6.17.20** ॥

अन्तर्धानगता ह्येते राक्षसाः कामरूपिणः।
शूराश्च निकृतिज्ञाश्च तेषां जातु न विश्वसेत्॥ **6.17.21** ॥

प्रणिधी राक्षसेन्द्रस्य रावणस्य भवेदयम्।
अनुप्रविश्य सोऽस्मासु भेदं कुर्यान्न संशयः॥ **6.17.22** ॥

अथ वा स्वयमेवैष च्छिद्रमासाद्य बुद्धिमान्।
अनुप्रविश्य विश्वस्ते कदाचित् प्रहरेदपि॥ **6.17.23** ॥

मित्राटविबलं चैव मौलभृत्यबलं तथा।
सर्वमेतद् बलं ग्राह्यं वर्जयित्वा द्विषद्बलम्॥ **6.17.24** ॥

प्रकृत्या राक्षसो ह्येष भ्रातामित्रस्य वै प्रभो।
आगतश्च रिपुः साक्षात् कथमस्मिंश्च विश्वसेत्॥ **6.17.25** ॥

रावणस्यानुजो भ्राता विभीषण इति श्रुतः।
चतुर्भिः सह रक्षोभिर्भवन्तं शरणं गतः॥ **6.17.26** ॥

रावणेन प्रणीतं हि तमवेहि विभीषणम्।
तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर॥ **6.17.27** ॥

राक्षसो जिह्मया बुद्ध्या सन्दिष्टोऽयमिहागतः।
प्रहर्तुं मायया छन्नो विश्वस्ते त्वयि चानघ॥ **6.17.28** ॥

वध्यतामेष तीव्रण दण्डेन सचिवैः सह।
रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः॥ **6.17.29** ॥

एवमुक्त्वा तु तं रामं संरब्धो वाहिनीपतिः।
वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत्॥ **6.17.30** ॥

सुग्रीवस्य तु तद् वाक्यं श्रुत्वा रामो महाबलः।
समीपस्थानुवाचेदं हनुमत्प्रमुखान् कपीन्॥ **6.17.31** ॥

यदुक्तं कपिराजेन रावणावरजं प्रति।
वाक्यं हेतुमदत्यर्थं भवद्भिरपि च श्रुतम्॥ **6.17.32** ॥

सुहृदामर्थकृच्छ्रेषु युक्तं बुद्धिमता सदा।
समर्थेनोपसन्देष्टुं शाश्वतीं भूतिमिच्छता॥ **6.17.33** ॥

इत्येवं परिपृष्टास्ते स्वं स्वं मतमतन्द्रिताः।
सोपचारं तदा राममूचुः प्रियचिकीर्षवः॥ **6.17.34** ॥

अज्ञातं नास्ति ते किञ्चित् त्रिषु लोकेषु राघव।
आत्मानं पूजयन् राम पृच्छस्यस्मान् सुहृत्तया॥ **6.17.35** ॥

त्वं हि सत्यव्रतः शूरो धार्मिको दृढविक्रमः।
परीक्ष्यकारी स्मृतिमान् निसृष्टात्मा सुहृत्सु च॥ **6.17.36** ॥

तस्मादेकैकशस्तावद् ब्रुवन्तु सचिवास्तव।
हेतुतो मतिसम्पन्नाः समर्थाश्च पुनः पुनः॥ **6.17.37** ॥

इत्युक्ते राघवायाथ मतिमानङ्गदोऽग्रतः।
विभीषणपरीक्षार्थमुवाच वचनं हरिः॥ **6.17.38** ॥

शत्रोः सकाशात् सम्प्राप्तः सर्वथा तर्क्य एव हि।
विश्वासनीयः सहसा न कर्तव्यो विभीषणः॥ **6.17.39** ॥

छादयित्वाऽऽत्मभावं हि चरन्ति शठबुद्धयः।
प्रहरन्ति च रन्ध्रेषु सोऽनर्थः सुमहान् भवेत्॥ **6.17.40** ॥

अर्थानर्थौ विनिश्चित्य व्यवसायं भजेत ह।
गुणतः सङ्ग्रहं कुर्याद् दोषतस्तु विसर्जयेत्॥ **6.17.41** ॥

यदि दोषो महांस्तस्मिंस्त्यज्यतामविशङ्कितम्।
गुणान् वापि बहून् ज्ञात्वा सङ्ग्रहः क्रियतां नृप॥ **6.17.42** ॥

शरभस्त्वथ निश्चित्य सार्थं वचनमब्रवीत्।
क्षिप्रमस्मिन् नरव्याघ्र चारः प्रतिविधीयताम्॥ **6.17.43** ॥

प्रणिधाय हि चारेण यथावत् सूक्ष्मबुद्धिना।
परीक्ष्य च ततः कार्यो यथान्यायं परिग्रहः॥ **6.17.44** ॥

जाम्बवांस्त्वथ सम्प्रेक्ष्य शास्त्रबुद्ध्या विचक्षणः।
वाक्यं विज्ञापयामास गुणवद् दोषवर्जितम्॥ **6.17.45** ॥

बद्धवैराच्च पापाच्च राक्षसेन्द्राद् विभीषणः।
अदेशकाले सम्प्राप्तः सर्वथा शङ्क्यतामयम्॥ **6.17.46** ॥

ततो मैन्दस्तु सम्प्रेक्ष्य नयापनयकोविदः।
वाक्यं वचनसम्पन्नो बभाषे हेतुमत्तरम्॥ **6.17.47** ॥

अनुजो नाम तस्यैष रावणस्य विभीषणः।
पृच्छ्यतां मधुरेणायं शनैर्नरपतीश्वर॥ **6.17.48** ॥

भावमस्य तु विज्ञाय तत्त्वतस्तं करिष्यसि।
यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ॥ **6.17.49** ॥

अथ संस्कारसम्पन्नो हनूमान् सचिवोत्तमः।
उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु॥ **6.17.50** ॥

न भवन्तं मतिश्रेष्ठं समर्थं वदतां वरम्।
अतिशाययितुं शक्तो बृहस्पतिरपि ब्रुवन्॥ **6.17.51** ॥

न वादान्नापि सङ्घर्षान्नाधिक्यान्न च कामतः।
वक्ष्यामि वचनं राजन् यथार्थं राम गौरवात्॥ **6.17.52**॥

अर्थानर्थनिमित्तं हि यदुक्तं सचिवैस्तव।
तत्र दोषं प्रपश्यामि क्रिया नह्युपपद्यते॥ **6.17.53**॥

ऋते नियोगात् सामर्थ्यमवबोद्धुं न शक्यते।
सहसा विनियोगोऽपि दोषवान् प्रतिभाति मे॥ **6.17.54**॥

चारप्रणिहितं युक्तं यदुक्तं सचिवैस्तव।
अर्थस्यासम्भवात् तत्र कारणं नोपपद्यते॥ **6.17.55**॥

अदेशकाले सम्प्राप्त इत्ययं यद् विभीषणः।
विवक्षा तत्र मेऽस्तीयं तां निबोध यथामति॥ **6.17.56**॥

एष देशश्च कालश्च भवतीह यथा तथा।
पुरुषात् पुरुषं प्राप्य तथा दोषगुणावपि॥ **6.17.57**॥

दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि।
युक्तमागमनं ह्यत्र सदृशं तस्य बुद्धितः॥ **6.17.58**॥

अज्ञातरूपैः पुरुषैः स राजन् पृच्छ्यतामिति।
यदुक्तमत्र मे प्रेक्षा काचिदस्ति समीक्षिता॥ **6.17.59**॥

पृच्छ्यमानो विशङ्केत सहसा बुद्धिमान् वचः।
तत्र मित्रं प्रदुष्येत मिथ्या पृष्टं सुखागतम्॥ **6.17.60**॥

अशक्यं सहसा राजन् भावो बोद्धुं परस्य वै।
अन्तरेण स्वरैर्भिन्नैर्नैपुण्यं पश्यतां भृशम्॥ **6.17.61**॥

न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावता।
प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः॥ **6.17.62**॥

अशङ्कितमतिः स्वस्थो न शठः परिसर्पति।
न चास्य दुष्टवागस्ति तस्मान्मे नास्ति संशयः॥ **6.17.63** ॥

आकारश्छाद्यमानोऽपि न शक्यो विनिगूहितुम्।
बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम्॥ **6.17.64** ॥

देशकालोपपन्नं च कार्यं कार्यविदां वर।
सफलं कुरुते क्षिप्रं प्रयोगेणाभिसंहितम्॥ **6.17.65** ॥

उद्योगं तव सम्प्रेक्ष्य मिथ्यावृत्तं च रावणम्।
वालिनं च हतं श्रुत्वा सुग्रीवं चाभिषेचितम्॥ **6.17.66** ॥

राज्यं प्रार्थयमानस्तु बुद्धिपूर्वमिहागतः।
एतावत् तु पुरस्कृत्य युज्यते तस्य सङ्ग्रहः॥ **6.17.67** ॥

यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति।
प्रमाणं त्वं हि शेषस्य श्रुत्वा बुद्धिमतां वर॥ **6.17.68** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तदशः सर्गः॥